Postal Regd.No. GAMC- 1553/2022-2024

ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १७ अङ्क : १९४
जुलाई - २०२२

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### जीवनरसस्य स्वामी

गुर्जरसाहित्यं प्रति मम आकर्षणम् आ बाल्यात् वर्तते । वयस्कस्य अपि मम तत् साहित्यं प्रति प्रीतिः निरन्तरं वर्धमाना अस्ति। तथापि गुर्जरभाषया मया किमपि लिखितं न। तस्य कारणं स्पष्टम् अस्ति। गुर्जरसाहित्ये वर्धमानः सम्मर्दः मां बाधते। अतः मया चिन्तितं यत् गुर्जरसाहित्यस्य आस्वादनेन सह संस्कृतभाषया किञ्चित् लेखनीयम्।

गुर्जरसाहित्यं प्रति मम प्रीतिं वर्धितवान् प्रशिष्टः साहित्यकारः धूमकेतुः । धूमकेतोः कथासु विद्यमानानि व्यक्तिचित्राणि मम हृदयं निम्नं प्रविश्य जीवनरसं जनयन्ति । अपरोऽपि जीवनरसप्रधानः साहित्यकारः मम हृदयम् अस्पृशत् । तस्य नाम अस्ति – दत्तात्रेयः बालकृष्णः कालेलकरः । कालानन्तरं सः 'काका कालेलकरः' नाम्ना रसिकजनानां हृदयानि अजयत्।

कालेलकरवर्यः सज्जनानां पुण्येन दीर्घं जीवितवान्। अन्तिमे वयसि तं कोऽपि पृष्टवान् – 'भवतः दीर्घायुष्यस्य रहस्यं किम्?' 'काका' अपि विनोदेन उक्तवान् – 'मृत्युः मां ग्रहीतुम् अविश्रमं यतते। किन्तु अहं नित्यप्रवासी। अतः सः स्थानात् स्थानं गच्छन्तं माम् अन्वेष्टुं न शक्नोति। आवयोः मेलनं भविष्यति तदा गाढम् आलिङ्गनं करिष्यावः!'

एवं दीर्घायुः सः व्यक्तित्वस्य तेजः प्रायः समग्रे शतके प्रसारितवान् । विभिन्नान् च विचारान् समाजाय समर्पितवान्। तत्रापि तस्य एकमेव विचारकेन्द्रं वर्तते। तदस्ति – 'जीवनरसः।' सः जीवनरसः एव तं क्वचित् विद्रोहं प्रति प्रेरयति । कदाचित् राष्ट्रीयं विनयनं प्रति प्रयोगं कर्तुं कर्षति । सः एव हिमालयस्य पदयात्रां कर्तुं बलं ददाति । अन्ते च गान्धिवर्यस्य चरणयुगले स्थिरं करोति । कालेलकरवर्यस्य कानिचन विचाररत्नानि अहम् अत्र विकिरामि । भवद्भ्यः रोचिष्यन्ते।

- वयं सामूहिके जीवने ऐक्यं साधयितुं शक्नुयाम चेत् अस्मासु राष्ट्रप्रेम वर्तते इति मन्तव्यम् । अन्यत् सर्वं तु केवलं काव्यात्मकम् अभिमानित्वम्।
- मनुष्येण संसारस्य अवेक्षया सह स्वीयं हृदयम् अपि अवेक्षणीयम्। केन्द्रहीनेन वर्तुलेन किं प्रयोजनम्?
- भारतस्य निष्ठावती शक्तिः दरिद्रेषु वर्तते। यदा दरिद्राः जागरिष्यन्ति तदा भारतस्य प्रगतिं कोऽपि रोद्धुं न शक्ष्यति।
- भारतीयानां प्रजानाम् उद्धारं न्यायाधीशाः कर्तुं न शक्ष्यन्ति। तत् कर्म तु शिक्षकैः एव कर्तव्यम्। अत्र शिक्षकाः क्लैब्यं प्रदर्शयिष्यन्ति चेत् छात्राः अपि तत् करिष्यन्ति।
- यस्मिन् समाजे सर्वदर्शिनः जागरूकाः पुरुषाः न वर्तन्ते, सः समाजः मृतप्रायः इति ज्ञातव्यम् । यस्मिन् समाजे प्रयोगवीराः पुरुषाः न वर्तन्ते, सः समाजः जीर्णः इति ज्ञातव्यम्। यस्मिन् समाजे वृद्धानां युवकानां च सम्मानः नास्ति, सः समाजः अल्पायुः इति ज्ञातव्यम्।

## निर्धनस्य प्रार्थना

मातङ्गः दशमे वयसि मातापितृवियोगं प्राप्तवान्। अतः दूरबन्धुः कश्चन अनाथं तम् अपोषयत्। मातङ्गस्य बुद्धिमत्ता न हि तीक्ष्णा। एतत् ज्ञातवान् सः दूरबन्धुः मातङ्गेन श्रमसाध्यानि एव कार्याणि कारयति स्म। महान् श्रमः कृतः चेदपि मातङ्गेन पूर्णोदरं भोजनं न प्राप्यते स्म। तदीयां दुरवस्थां दृष्ट्वा प्रतिवेशी नागराजः कदाचित् एकान्ते तम् अवदत् – "अये ! इतोऽपि कियत्कालम् एतादृशं दयनीयं जीवनं याप्येत भवता ? महिषपुरे पद्मनाभः नाम कश्चन मम बन्धुः अस्ति। भवान् तत्र गच्छतु। सः कञ्चित् उत्तमं मार्गं दर्शयितुम् अर्हति" इति।

प्रतिवेशिनः बोधनस्य अनुगुणं महिषपुरं गतः मातङ्गः पद्मनाभं दृष्ट्वा स्वस्य कथाम् अश्रावयत्। सर्वं श्रुत्वा पद्मनाभः अवदत् – "अहं न धनिकः। सेवकस्य आवश्यकता अपि नास्ति मम। मित्रेण नागराजेन भवान् प्रेषितः इत्यतः गृहे वासाय भवते स्थलं कल्पयामि। पूर्णोदरं भोजनम् अपि दास्यामि। किन्तु एषोऽत्र नियमः यत् मया यत्र सूच्यते तत्र भवता कार्यं करणीयम्। कस्माच्चिदपि धनं न याचनीयम्" इति।

मन्दमतिः मातङ्गः एतं प्रस्तावम् अङ्गीकृतवान्। पद्मनाभः ग्रामस्य विविधगृहाणि प्रति कार्याय मातङ्गं प्रेषयति स्म। स्वयं च तेभ्यः गृहेभ्यः धनं प्राप्नोति स्म। मातङ्गः प्रतिदिनं पद्मनाभस्य गृहे भोजनं तु प्राप्नोति स्म एव। किन्तु वराटिका अपि न प्राप्यते स्म तेन। दूरबन्धोः गृहात् अपि अत्रैव सुखम् इति अचिन्तयत् मातङ्गः।

कानिचन दिनानि अतीतानि। कदाचित् प्रातः एव मातङ्गः शरीरे महतीं वेदनां प्राप्तवान्। सः एतम् अंशं पद्मनाभम् अवदत्। तदा पद्मनाभः अवदत् – "एतेन व्याजेन किं कार्यं परित्यक्तुम् इष्यते भवता ? एवं चेत् अद्य भवता भोजनं न प्राप्येत। कार्यकरणात् एव भोजनं भवतः" इति। मातङ्गस्य अधिकबुभुक्षा अपि न आसीत्। अतः सः तस्मिन् दिने कार्याय न गतः। सः कस्यचित् वैद्यस्य गृहं गत्वा स्वस्य शरीरस्य वेदनाम् अश्रावयत्। वैद्यः तं परीक्ष्य अवदत् – "भवतः ज्वरः अस्ति। शुल्कं यदि दीयेत तर्हि अहं चिकित्सां कुर्याम्" इति।

"महोदय ! मम समीपे वराटिकामात्रम् अपि धनं नास्ति। यदि भवान् औषधं दद्यात् तर्हि अहं स्वास्थ्यं प्राप्य भवद्गृहे कार्यं कृत्वा ऋणं प्रत्यर्पयिष्यामि" इति अवदत् मातङ्गः। वैद्यः एतत् निराकुर्वन् अवदत् – "भवान् यस्मिन् गृहे कार्यं करोति तस्मात् भृतिधनं पद्मनाभः स्वीकरोति एव। अतः पद्मनाभं सम्प्रार्थ्य धनम् आनीयताम्। धनं प्राप्तं चेदेव चिकित्सा क्रियते मया" इति। वैद्यस्य कथनात् मातङ्गः अवगतवान् यत् मम परिश्रमस्य फलं पद्मनाभः स्वीकुर्वन् अस्ति इति। अतः सः पद्मनाभसमीपं गत्वा वैद्येन उक्तं श्रावितवान्।

तदा पद्मनाभः सकोपम् अवदत् – "मया चिकित्साभारः उह्यते इति तु न उक्तम्। भवतः परिश्रमात् यावत् प्राप्यते तावत् तु भवतः भोजनाय अपि न अलम्। गृहस्य अन्तः शयनाय अपि मया भवते निश्शुल्कं स्थलं दत्तम् अस्ति" इति। "इदानीम् अहम् अस्वस्थः अस्मि। चिकित्सा तु अपरिहार्या। मत्समीपे धनं नास्ति। अतः चिकित्सायै भवान् धनं ददातु। स्वस्थः अहं भवता सूचितं कार्यं करिष्यामि एव" इति मातङ्गः अवदत् दैन्येन।

किन्तु पद्मनाभः स्वविचारं परिवर्तयितुम् अनिच्छन् अवदत् – "निर्धनत्वं मनसि निधाय मया आश्रयः दत्तः। भवान् तु मत्तः धनं स्वीकर्तुं प्रयतते। एतत् न अनुमन्यते मया। कोऽपि यदि धनं दद्यात् तर्हि भवान् चिकित्सां प्राप्नोतु नाम" इति।

ततः यत्र यत्र कार्यं कृतं तत्र सर्वत्र गत्वा धनं याचितवान् मातङ्गः। किन्तु कोऽपि तस्य साहाय्यं कर्तुं न प्रवृत्तः। अन्ते सः पुनः अपि वैद्यस्य समीपं गत्वा दैन्येन अवदत् – "अहम् अनाथः। इदानीं अकिञ्चनः अस्मि। कृपया मम

चिकित्सा क्रियताम्। अहं कथमपि भवतः ऋणं प्रत्यर्पयिष्यामि एव" इति। एवं वदतः तस्य नेत्राभ्याम् अश्रुधारा निर्गता। "अनाथानां रक्षकः भवति भगवान्, न वैद्यः" इति कठोरस्वरेण अवदत् वैद्यः।

नितरां खिन्नः मातङ्गः शिवालयस्य दिशि प्रस्थितवान्। मध्येमार्गं महती वृष्टिः आरब्धा। कथञ्चित् शिवालयसमीपं गत्वा मातङ्गः दैन्येन प्रार्थितवान् – "भगवन्! नेत्रे उद्घाटयितुं, स्थातुं वा सर्वथा शक्तिः नास्ति मम इदानीम्। भवता एव अहं रक्षणीयः" इति। अग्रे वक्तुम् अशक्तः सः नन्दिमूर्तेः पार्श्वे अपतत् विसंज्ञतां प्राप्य।

ततः पञ्चषनिमेषाभ्यन्तरे गोदावर्यां महाप्रवाहः उत्पन्नः। नदी ग्रामम् अपि प्राविशत्। बहूनां कुटीराः गृहाणि च जले निमग्नानि जातानि। ग्रामाधिकारी सेवकानां द्वारा साहाय्यकार्यम् आरब्धवान्। कश्चित् मन्दिरस्य पुरतः विसंज्ञतया पतितं मातङ्गं नीत्वा सुरक्षितं स्थलं प्रापितवान्।

महाप्लववार्ता राज्ञा अपि ज्ञाता। सः नन्दिवर्मनामकं पुरुषं राजप्रतिनिधित्वेन महिषपुरं प्रति प्रेषितवान्। निराश्रयाणां कृते वासकेन्द्राणि तेन आरब्धानि। प्रवाहपीडां प्राप्तवतां कृते आहारवस्त्रादिव्यवस्था अपि तेन आरब्धा। चिकित्साव्यवस्था अपि प्रवृत्ता। एवं धनव्ययं विनैव मातङ्गेन चिकित्सा प्राप्ता। परिश्रमं विनैव भोजनम् अपि प्राप्तम्। प्रवाहकारणतः ये बालाः अनाथाः जाताः तेषां निमित्तं शिक्षणव्यवस्था अपि तत्र उपकल्पिता। एतत् सर्वं दृष्ट्वा मातङ्गः नितरां सन्तुष्टः।

सः अचिन्तयत् यत् मम प्रार्थनां पुरस्कृत्य एव शिवः राजदूतं महिषपुरं प्रति प्रेषितवान् इति। सः नन्दिवर्मणा मिलित्वा पादस्पर्शपूर्वकं तं प्रणम्य अवदत् – "मम, ग्रामीणानां च रक्षणार्थं भवन्तं दूतत्वेन प्रेषितवान् सः भगवान् निश्चयेनास्ति धन्यवादार्हः" इति।

मातङ्गस्य कथनस्य आशयः झटिति न ज्ञातः नन्दिवर्मणा। सः विचारणात् सर्वं ज्ञात्वा मातङ्गम् अवदत् – "अहं न शिवस्य दूतः। प्रवाहपीडां प्राप्तवतां साहाय्याय राज्ञा प्रेषितः प्रतिनिधिः अस्मि अहम्। एतस्य देशस्य राजा प्रजाहितैकचिन्तकः। यदि भगवति भवतः गाढा भक्तिः स्यात् तर्हि सः भवता प्रार्थनीयः यत् राजा दीर्घायुः स्वस्थः सुखी च भवेत् इति"।

एतदनन्तरं मातङ्गः नेत्रे निमील्य प्रार्थनाम् अकरोत् – "हे भगवन्! भवान् सर्वव्यापी खलु? अतः अत्रैव स्थित्वा अहं प्रार्थनां करोमि। अस्माकं देशस्य राजा उत्तमः। तस्मिन् भवतः कृपादृष्टिः भवतु। अनाथानाम् अस्मादृशानां साहाय्यार्थं प्रतिग्रामं गङ्गामाता प्रेषणीया, ग्रामः जले मज्जनीयः च" इति।

एतत् श्रुत्वा नितरां क्रुद्धः नन्दिवर्मा कठोरस्वरेण अवदत् – "अयि मूर्ख! का एषा प्रार्थना भवतः? प्रतिग्रामं प्रवाहपीडा इष्यते खलु भवता? प्रवाहपीडायाः दुष्परिणामः किं भवता न ज्ञायते?" इति।

तदा मातङ्गः अवदत्– "महोदय! अहं यदा ज्वरग्रस्तः आसं तदा ग्रामस्थः कोऽपि मम साहाय्यं न कृतवान्। वैद्यः अपि चिकित्सां निराकृतवान्। यदि महाप्लवः न स्यात् तर्हि प्रायः मम मरणम् अभविष्यत्। ये निर्धनाः आहारवस्त्राद्यभावेन ग्रस्ताः तेषां का हानिः भवेत् प्रवाहपीडातः? राजा यत् ददाति ततः अस्माकं लाभः एव। लाभाय मया प्रार्थना कृता। किम् एषा अनुचिता?" इति।

एतत् श्रुत्वा नन्दिवर्मा क्षणं स्तब्धः। मातङ्गस्य प्रार्थनायां वास्तविकता अस्ति इति सः अवगतवान्। राजधानीं प्राप्य सः राजानं प्रवृत्तं सर्वम् अवदत्। सर्वं श्रुत्वा राजा निश्चितवान् यत् न केवलं प्रवाहकाले, अपि तु सर्वदा अपि निर्धनानां साहाय्यं करणीयम् इति। ततः सः एतदर्थं योग्यां योजनां कृत्वा तां क्रियान्विताम् अपि अकरोत्। मातङ्गस्य प्रार्थनायाः कारणतः उत्तमा योजना राज्ये आगता। जनाश्च लाभान्विताः जाताः।

## ग्रन्थपरिचयः ( दूतवाक्यम् )

व्योम शाहः

कविकुलगुरु–कालिदासेन यः प्रथितयशस् इति विशेषणेन संस्तुतः, तस्यैव महाकविभासस्य नाटकचक्राद् अद्य 'दूतवाक्यम्' इति नामधेयस्य व्यायोगस्य मधुकरा इव वयं रसास्वदनं करिष्यामः।

**कृतिप्रकारपरिचयः** – साहित्यदर्पणकृता विश्वनाथेन दशविधानां रूपकाणां निरूपणं कृतम्। तेषु 'व्यायोगः' इति एकतमं रूपकम्। व्यायोगे नाट्यप्रकारे एकः एव अङ्कः भवति। सः इतिवृत्तेन संवलितः यत्र नायकः धीरोद्धतप्रकारकः। नाटिकायाः विपरीतः अयं पुरुषबहुलः भवति तथा च हास्य–शान्त–रसाः अस्मिन् गौणत्वं भजन्ते।

**कृतेः मुख्यः आधारः** – दूतवाक्यमिति व्यायोगस्य मुख्यः आधारः महाभारतस्य उद्योगपर्वणि स्थितः श्रीकृष्णस्य दौत्येन शान्तिप्रस्तावप्रसङ्गः। व्यायोगे अस्मिन् भासेन प्रसङ्गः तथागतः न वर्णितः। अत्र बहुषु अंशेषु तैः परिवर्तनानि कृतानि।

**पात्राणि – मुख्याः** – दुर्योधनः, श्रीकृष्णः, कञ्चुकीयः (बादरायणः) धृतराष्ट्रः, श्रीसुदर्शनश्चेति।

**गौणाः** – (अप्रकटाः) – वैकर्णः, वर्षदेवः, शकुनिः, दुःशासनः च।

**कथावस्तु** – अस्य व्यायोगस्य मुख्यः सारः तु धार्तराष्ट्रैः कृतम् आगतस्य श्रीकृष्णस्य भर्त्सनं श्रीवासुदेवस्य च विराट् रूपदर्शनम्। अस्य व्यायोगस्य प्रारम्भः इन्द्रस्तुतिद्वारा भवति। सूत्रधारः सङ्क्षेपेण स्थितिं ज्ञापयति यत् पाण्डवानां कौरवाणां च मिथः युद्धस्थितिः समुत्पन्नाऽस्ति। एतेन स्थापना समाप्तिं गच्छति।

इतः कञ्चुकीयः प्रविश्य कथयति यद् महाराजेन दुर्योधनेन मन्त्रशाला कारिता। सर्वेऽपि सामन्तादयः तत्र आहूताः। तत्र चर्चाऽभवत् यत् 'कौरवाणां सेनायाः सेनानीः कः भवितुम् अर्हति' इति। मातुलस्य शकुनेः वचनं समर्थयन् गाङ्गेयः भीष्मः सेनापतिरूपेण स्थापितः। तदैव कञ्चुकीयः प्रविश्य निवेदयति यत् पाण्डवानां शिबिरात् 'नारायणः' आगतः इति। क्रुद्धः सन् दूर्योधनः तं समुदयाचारं स्मारितवान्।

ततः सः उक्तवान् यत् दूतः केशवः अत्र सम्प्राप्तः। श्रीकृष्णस्य अपमानं कर्तुं तेन युक्तिः चिन्तिता। सः सर्वान् सदस्यान् प्रत्यादिशत् यत् केशवे सभायां प्रविष्टे यदि कश्चित् स्वस्थाने उत्थास्यति चेत् सः द्वादशसहस्रमुद्राभिः दण्ड्यः भविष्यति। ततः सः स्वस्य समुत्थानं रोद्धुं निमित्तं चिन्तयन् कञ्चुकीयं चित्रपटं नाययित्वा करयोः गृहीतवान्। तस्मिन् चित्रपटे द्यूतप्रसङ्गः आलिखितः आसीत्। तं पश्यन् दुर्योधनः कतिपयैः श्लोकैः अवर्णयत्। ततः कञ्चुकीयः आदिष्टः आह्वानार्थं केशवस्य। केशवे सभायां प्रविष्टे सर्वेऽपि स्वस्थाने उत्थिताः। दुर्योधनः सर्वान् दण्डविषयं स्मारितवान् किन्तु तथाकरणे सोऽपि स्वकीयात् आसनात् च्युतः अभवत्। सर्वे स्वस्थानमुपविष्टाः। दर्योधनः देवपुत्राणां पाण्डवानां कुशलवार्तां पृच्छति। वासुदेवोऽपि तन्निवेद्य तमेव कुशलवार्तां पृच्छति।

ततः श्रीवासुदेवः पाण्डवानां पक्षतः दायादविषये विज्ञापयति। तदा हठी दुर्योधनः पितृव्यस्य पाण्डोः शापं स्मारयति वदति च तस्मादेव प्रसङ्गात् पाण्डवानां राज्यस्य कृते कश्चिदपि अधिकारः न वर्तते। एतत् श्रुत्वा श्रीवासुदेवः दुर्योधनं विचित्रवीर्यप्रसङ्गं स्मारयित्वा कौरवाणां राज्याधिकारविषये प्रतिप्रश्नं कुरुते। सः दुर्योधनाय निवेदयति यत् परस्परकलहेन कुरुकुलं नामशेषम् एव भविष्यति इति। अस्य प्रत्युत्तरं दुर्योधनः अजानन् तं कथञ्चित् मूकीकरोति। व्यावृत्य सोऽपि तमेव तस्य कौरवेषु दयाविषये प्रतिप्रश्नं करोति। शनैः शनैः उभयोः वचसि तीव्रता वर्धते। श्रीवासुदेवः प्रत्येकस्य पाण्डवस्य नैपुण्यं दुर्योधनाय कथयति, सन्तर्कयति च – ''अन्यथा सागरान्तां हरिष्यन्ति हि पाण्डवाः।'' उभयोः कोपः अभलिहः भवति। श्रीवासुदेवः विराट्रूपेण प्रादुर्भवति।

दुर्योधनः तां मायां विज्ञाय भ्रातॄन् आदिशति यत्ते दूतं केशवं पाशैः बध्नीयुः। क्षणमात्रेण कालेन सर्वेऽपि सभासदः केशवाः भवन्ति, पाशैः च बद्धाः स्वयं पतन्ति। दुर्योधनः तद् दृष्ट्वा बहिः निष्क्रामति। श्रीवासुदेवेन सर्वाणि स्वीयानि शस्त्राणि आहूतानि। प्रथमं श्रीसुदर्शनः प्रविशति। उभयोः कश्चित् संवादः जायते। सुदर्शनः श्रीवासुदेवस्य कोपं शमयति। ततः आगतानि सर्वाण्यपि अस्त्राणि सुदर्शनेन निवार्यन्ते। ततश्च सः स्वस्थानं गच्छति।

इतः प्रशान्तः श्रीवासुदेवः पाण्डवशिबिरं गन्तुम् उद्यतः भवति। तदैव धृतराष्ट्रः वासुदेवस्य चरणाभिलाषी तस्यैव चरणयोः पतति। श्रीवासुदेवः तम् उत्थापयति। प्रसन्नतां प्रदर्श्य उभौ अपि स्वस्थानं गच्छतः। समाप्तौ भरतवाक्यं युक्तस्य राज्ञः विषये कथयति। **''इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।**
**महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः॥''**

वैशिष्ट्यं मुख्याधारात् च भेदः १. मुख्याख्याने धृतराष्ट्रः एव नृपः। अत्र कविना सः दुर्योधनः नृपरूपेण दर्शितः। २. सर्वाणि अपि अस्त्राणि मानवरूपेण प्रादुर्भवन्ति इति मौलिकी विशेषता कवेः।

## मासवार्ता

**आरब्धः ''Value Education Through Sanskrit बालसंस्कृतवर्गः'' इति अभ्यासक्रमः।**

बालकाः संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतेः परिचयं प्राप्नुयुः इति लक्ष्यीकृत्य एकलव्य-संस्कृत-एकेडेमीसंस्थानेन ''Value Education Through Sanskrit बालसंस्कृतवर्गः'' इति अभ्यासक्रमः सञ्चाल्यते। अभ्यासक्रमेऽस्मिन् Skg तः ८ कक्ष्यायाः छात्राणां कृते संस्कृतपाठनस्य उत्तमा व्यवस्था कल्पितास्ति। एतेन अभ्यासक्रमेण बालेषु विविधाः क्षमताः तद्यथा उच्चारणशुद्धिः, स्मरणशक्तेः विकासः व्यक्तित्वविकासश्च वर्धिष्यन्ते। अत्र उल्लेखनीयं यत् बालैः सह तेषाम् अभिभावकानां कृते अपि संस्कृताध्यापनस्य व्यवस्था संस्थानेन कल्पितास्ति। श्रीश्यामः पटेलः, श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेलः, श्रीपारुलः व्यासः. डॉ. अमी जोशी च छात्रान् संस्कृतं पाठयिष्यन्ति। अभ्यासक्रमोऽयं मार्चमासपर्यन्तं प्रवर्तिष्यते।






## कृपया हसन्तु

काचित् महिषी वने भयेन धावन्ती आसीत्, तां दृष्ट्वा-

मूषकः - भोः ! किमर्थं पलायसे ?

महिषी - गजं ग्रहीतुम् आरक्षकाः वनं प्रति आगताः सन्ति ।

मूषकः - किन्तु त्वं तु महिषी असि खलु !

महिषी - भोः त्वं तु अस्माकं न्यायप्रणालिकां जानासि एव । यदि ते मां ग्रहीष्यन्ति तर्हि 'अहं गजः नास्मि महिषी एव अस्मि' इति प्रतिपादयितुं २० वर्षाणि भविष्यन्ति ।

एतत् श्रुत्वा मूषकोऽपि पलायनम् आरब्धवान् ।

★ ★ ★ ★ ★

युवकस्य समस्यां श्रुत्वा कश्चन धूर्तः अवदत् - "भोः वत्स ! सर्वं सम्यक् भविष्यति । भवतः सर्वाः समस्याः अपगमिष्यन्ति । किन्तु तन्निमित्तं भवता कश्चन विधिः करणीयः भविष्यति । एतस्मिन् कर्मणि किञ्चित् व्ययः भविष्यति ।"

एतत् श्रुत्वा - "कियान् व्ययः भविष्यति" इति अपृच्छत् युवकः । "भोः पुत्र ! तव सकाशात् अहम् अधिकं न स्वीकरोमि किन्तु अस्माकं शास्त्रेषु ३३ कोटिः देवताः उक्ताः सन्ति । तर्हि प्रत्येकं देवतायै एकपैसानाणकम् एव भवता दातव्यम्" इति अवदत् धूर्तः । (युवकेन मनसि गणना कृता यत् अयं धूर्तः ३० लक्षरूप्यकाणि याचन्ते ) ततः सः युवकः अवदत् - "भवतु, भवान् एकं एकं नाम वदतु अहं तदनुगुणं भवते धनं दास्यामि ।" एतत् श्रुत्वा धूर्तः तत्रैव मूर्च्छितः जातः ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**क्वचिदर्थः क्वचिद्धर्मः क्वचिन्मैत्री क्वचित् यशः ।**
**कर्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला ॥**

**तात्पर्यम्** – चिकित्सया कदाचित् धनं लभ्येत। पुनः कदाचित् धर्मः सम्पाद्येत। अन्यदा कदाचित् मित्रलाभः भवेत्। पुनः कदाचित् यशः प्राप्येत। कदाचित् चिकित्सा कर्माभ्यासाय वा भवति। अतः चिकित्सा कदापि निष्फला न।

**खलः सर्षपमात्राणि परच्छिद्राणि पश्यति ।**
**आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥**

**तात्पर्यम्** – दुर्जनः अन्येषां सर्षपमात्राणि अपि छिद्राणि पश्यति, परन्तु आत्मनः तु बिल्वमात्राणि अपि सः न पश्यति।

**खलास्तु दूरतस्त्याज्याः कण्टका इव सर्वथा ।**
**येषां क्षणिकयोगेन सन्मार्गोऽप्यतिदुःखदः ॥**

**तात्पर्यम्** – दुष्टाः दूरात् एव परित्यक्तव्याः यतः ते सन्ति कण्टकाः इव। कण्टकाः यथा दुःखं यच्छन्ति तथैव दुष्टाः क्षणं यावत् सम्पर्के भवन्ति चेदपि दुःखं यच्छन्ति।

## ज्ञानसरित्

श्यामः पटेलः

**सर्वेन्द्रियाणां नयनं प्रधानम्** – चाणक्यः स्वकीये नीतिग्रन्थे वदति यत् सर्वेषाम् इन्द्रियाणां नयनेन्द्रियम् एव प्रधानम् अस्ति (चा.नीतिः ९-०४) अतः अद्य नयनविषये अवगन्तुं यतामहे । मनुष्यस्य नेत्रेन्द्रियं लक्षाधिकप्रकारकान् वर्णान् परीक्षितुं शक्नोति । ''डिझिटल केमेरा'' यन्त्रेण सह तुलनां कुर्मः चेत् अस्माकं नेत्रद्वयं ०६ मेगापिक्सलपरिमितस्य अस्ति । जागर्यावस्थायाम् अस्माकं समयस्य दशांशं वयं नेत्रयोः निमीलने एव यापयामः । ''गोल्ड फिश'' नामाख्येन मत्स्येन सहितं प्रायः सर्वेषां मत्स्यानां नेत्रस्य उपरि नयनच्छदः एव न भवति । खगोष्ट्रस्य तु मस्तिष्कस्य अपेक्षया नेत्रं बृहद् भवति ।

मनुष्याणां केषाञ्चित् नेत्रयोः वर्णः कपिलः नीलश्च भवति । किन्तु पशूनां ''ब्लेक लेमूर'' सञ्ज्ञकस्य पशोः एव नेत्रयोः वर्णः नीलः भवति । मधुमक्षिकायाः शिरसि पञ्च नेत्राणि भवन्ति । सरटः तु स्वं नेत्रद्वयं युगपत् विपरीतां दिशं प्रति भ्रामयितुं समर्थः । यथा मनुष्यः अभिमुखं स्थितस्य मनुष्यस्य नेत्रेण कृतं सङ्केतम् अवगन्तुं शक्नोति तथा पशुषु केवलं श्वानः अवगन्तुम् अर्हति । मार्जारस्य नेत्रस्य उपरि तु त्रयः नयनच्छदाः विद्यन्ते । अन्धकारे अस्माभिः सर्वत्र यः कृष्णवर्णः दृश्यते, सः वर्णः 'आइगनग्रो' वर्णः कथ्यते । अस्माकं नेत्रलोमानि एकैकं पतित्वा ६४ दिनान्तरं पुनः जायन्ते ।

नयनच्छदः – eyelid, सरटः – chameleon
खगोष्ट्रः – ostrich, नेत्रलोमन् – eyelash



## शब्दमञ्जूषा

| | |
|---|---|
| **प्रतीक्षालयः** | waiting room |
| **सदनत्यागः** | walk out |
| **योद्धा** | warrior |
| **अस्त्रम्** | weapon |
| **कल्याणम्** | welfare |
| **निपुणः** | well-versed |
| **चक्रम्** | wheel |
| **चक्रवातः** | whirlwind |
| **शठः** | wicked |
| **वातायनम्** | window |
| **साक्षी** | witness |
| **कार्यसमितिः** | working committee |
| **माला** | wreath |
| **अङ्गनम्** | yard |
| **ज्योतिश्चक्रम्** | zodiac |

## किं भवन्तः जानन्ति ?

**१ ) भारतीयपरम्परायां लोकपालानां सङ्ख्या कियती सन्ति ?**
(क) ४ (ख) ५ (ग) ८ (घ) १०

**२ ) कति नक्षत्राणि सन्ति ?**
(क) २० (ख) २५ (ग) २६ (घ) २७

**३ ) कति अश्वमेधयज्ञान् कृत्वा इन्द्रपदं प्राप्तुं शक्यते ?**
(क) ७० (ख) ८० (ग) ९० (घ) १००

**४ ) विष्णोः अवतारेषु रामस्य अवतारः कतमः आसीत् ?**
(क) सप्तमः (ख) अष्टमः (ग) नवमः (घ) दशमः

**५ ) कतिप्रकारकाः नरकाः मताः सन्ति ?**
(क) २१ (ख) २२ (ग) २३ (घ) २४

**६ ) कतिप्रकारकाः महाविद्याः मताः सन्ति ?**
(क) ८ (ख) ९ (ग) १० (घ) ११

**७ ) कति रुद्राः सन्ति ?**
(क) १० (ख) ११ (ग) १२ (घ) १३

उत्तराणि – (१) ग (२) घ (३) घ (४) क (५) क (६) ग (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## स्तोत्रपाठः

**( शिवपूजनम्, शिवमहिम्नः स्तोत्रं च )**

**Date** : 05/07/2022 to 04/08/2022
**Day** : Tuesday - Thursday
**Time** : 06:30 pm to 8:00 pm
**Fees** : Rs. 2500/-

**Learn Online**

## स्तोत्रपाठः

**( मातृपूजनम्, शक्रादयस्तुतिः च )**

**Date** : 09/08/2022 to 08/09/2022
**Day** : Tuesday - Thursday
**Time** : 06:30 pm to 8:00 pm
**Fees** : Rs. 2500/-

**Contact: Dr Mihir Upadhyay - 98246 16237**

संस्कृत-साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા ઇચ્છો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા ઇચ્છો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા ઇચ્છો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા ઇચ્છો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજિત

# "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી માન્ય કોર્ષમાં**
ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

**અભ્યાસક્રમની વિશેષતાઃ**

→ તાલીમ માટેનું ગુણવત્તાયુક્ત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડો. મિહિર ઉપાધ્યાય **9824616237**

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006